# রাজবাহনচরিতম ব্যাখ্যা

## 1. दयित ! त्वत्प्रसादादस्य मे चरितार्था  श्रोत्रवृत्तिः। अद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः। पक्कमीदानीं त्वत्पादपद्मपरिचर्य्याफलम्।

दण्डिना विरचितं दशकुमारचरितं संस्कृतसाहित्ये एकं प्रसिद्धं गद्यकाव्यम् । तस्य् दशकुमारचरितस्य राजवाहनचरितसंज्ञके प्रथमे उच्छ्वासे अयमंशः स्मुपलभ्यते। राजवाहनमुद्दिश्य अवन्तिसौन्दर्य्या उक्तिरियम्।

दयित ! हे प्रिये ! अद्य संप्रति, त्वत्प्रसादात् तव अनुग्रहणे , मे मम, श्रोत्रवृत्तिः श्रवणेन्द्रियः, चरितार्था सफला जाता। अद्य मे मनसि चित्ते, त्वया भवता, तमोपहः अज्ञानान्धकारनाशकः ज्ञानप्रदीपः ज्ञानरूपलोकः, दत्तः प्रज्ज्वलितः, स्थापित इत्यर्थः । ईदानीम् अधुना, त्वत्पादपद्मपरिचर्य्याफलं भवतः चरणकमलसेवायाः फलं, पक्कम् परिणतं पूर्णतां गतम् इत्यर्थः ।

कन्यान्तःपुरं प्रविष्टः राजवाहनः अवन्तिसुन्दर्य्या सह विश्रम्भालापरतो बभूव। तत्र स चित्तहारिणा चतुर्दशभुवनवृत्तान्तेन अवन्तीसुन्दरीं तोषयामास । तच्छ्र्वणेन कृतकृतार्था अवन्तिसुन्दरी प्रियतममुद्दिश्य एवमवदत् - " कर्णयोः यत् सार्थकं तत् खलु मधुरवृत्तान्तश्रवणम्। तदद्य लव्धम् भवतः प्रसादात्। न केवलं भवता कथितं वृत्तान्तं मधुरम्, अपितु ज्ञानगर्भं तत्। विदूरितः तच्छ्र्वणेन अज्ञानान्धकारः"। राजवाहनः रुक्मिण्यादिभिः कृष्णस्य, शकुन्तलादुष्यन्तादीनां च गान्धर्वविवाहकरणविषयं वृत्तान्तं श्रावयामास। अनेन गान्धर्वविवाहेन परिणीतानां पुण्यवत्त्वज्ञानाद्राजवाहनेन सह गान्धर्वविवाहः तस्य अपि पुण्यवत्तं संपादयेदिति मतिः उत्पन्ना।

पापवोधविलोपात् नितरां हृष्टया अवन्तिसुन्दर्य्या इदानीं विज्ञाप्यते कृतज्ञता। तमोपहः ज्ञानप्रदीपः इत्यत्र श्लिष्टपरस्परितरूपकालङ्कारः।

## 2. भीषणभ्रूकुटिदूषितललाटः काल इव काललोहदण्डकर्कशेन वाहुदण्डेनावलम्व्य हस्ताम्वुजे रेखाम्वुजरथाङ्गलाञ्छने राजपुत्रं सरभसमाचकर्ष।

दण्डिना विरचितं दशकुमारचरितं संस्कृतसाहित्ये एकं प्रसिद्धं गद्यकाव्यम् । तस्य् दशकुमारचरितस्य राजवाहनचरितसंज्ञके प्रथमे उच्छ्वासे अयमंशः स्मुपलभ्यते। अवन्तिसौन्दरीं प्रति चण्डवर्म्मणः उक्तिरियम्।

माद्दतेशु अपि पुरुषसिंहेषु पुरुषश्रेष्ठसु जनेषु सावमाना साहङ्कारा, पापा पापिनी, इयम् अवन्तीसुन्दरी, कथं किम्प्रकारम्, एवं व्राक्ष्मणव्रुवम् व्राक्ष्मणधमम्, अनुरक्ता एनं प्रति अनुरागिणी इत्यर्थः। एतेन चण्डवर्म्मणोऽपि अवन्तिसुन्दर्य्या परिणयाभिलाष आसीदिति व्यज्यते। "यदुवंशीयानामिव चण्डवर्म्मणोऽपि मातुलकन्यापरिणययोग्यता तु तदानीन्ततद्देशाचारादिति मन्तव्यम्" - इति हरिदाससिद्धान्तवागीशाः। अद्य एव इयम् अनार्याशीला पापशीला कुलपांसनी कुलकलङ्किनी, पतिम् स्वामिनं, शूलावतंसितम् शूलारोपितम् पश्यतु अवलोकयतु - इति निर्भर्तसयन् तिरष्कृत्य भीषणभ्रूकुटिदूषितललाटः भयालभ्रूकुटिविकृतललाटः, काल इव काललोहदण्डकर्कशेन कृष्णलौहदण्डकर्कशेन, वाहुदण्डेन अवलम्व्य हस्ताम्वुजे पाणिकमले, रेखाम्वुजरथाङ्गलाञ्छने पद्मचक्रचिह्नितेे, राजपुत्रं, राजवाहनं , सरभसम्, सवेगम्, आचकर्ष आकृष्टवान् ।

रक्षिपुरुषाः अन्तःपुरं प्रविश्य राजवाहनं शृङ्खलितं द्दष्ट्वा सपदि तत् वृत्तान्तं चण्डवर्म्मणे निवेदयामासुः। सोऽपि कोपादागत्य राजवाहनं विलोक्य तं तदनुजमरणनिमित्तभूतायाः वालचन्द्रिकायाः पत्युः

पुष्पोद्भवस्य मित्रम् इत्यवोधि। किञ्च आसीत् तस्यापि अवन्तिसुन्दर्य्याम् अभिलाषः। अतः नितरां क्षुव्धः अवमानितश्च भयालभ्रूकुटिविकृताननः चण्डवर्म्मा अवन्तीसुन्दरीं तिरस्कुर्वन्, "अद्य एक सा राजवाहनं शुलारोपितं द्रक्षाति" - इति घोषयंश्च लौहदण्डकर्कशेन वाहुदण्डेन राजवाहनस्य कमलकोमलपाणियुगलं सवेगमाकृष्टवान्।

**3. अवसितश्च ममाद्य शापः। तच्च मासद्वयं तव पारतन्त्र्यम्। प्रसीदेदानीम्। किं तव करणीयम् ?**

दण्डिना विरचितं दशकुमारचरितं संस्कृतसाहित्ये एकं प्रसिद्धं गद्यकाव्यम् । तस्य् दशकुमारचरितस्य राजवाहनचरितसंज्ञके प्रथमे उच्छ्वासे अयमंशः स्मुपलभ्यते। राजवाहनमुद्दिश्य सुरसौन्दर्य्या सुरतमञ्जर्य्या उक्तिरियम्।

मातङ्गपतिना चण्डपोतेन कन्यान्तःपुरदूषकस्य राजवाहनस्य वधम् आज्ञापयामास चण्डवर्म्मा। निर्दिष्टे काले च राजवाहनः रक्षिभिः राजाङ्गनं निन्ये। उपतस्थे च क्षरितगण्डः चन्डपोतः। तस्मिन्नेव क्षणे राजवाहनचरणलग्ना सा रजतश‍ृङ्खला सुरतमञ्जरी नाम काचिदप्सरोरूपिणी भूत्वा आत्मनो मार्कण्डेयशापात् रजतश‍ृङ्खलारूपधारणादिवृत्तान्तं वक्तुमारेभे।

एकदा आकाशे पद्मभ्रमेण मुखमनुसरन्तं कञ्चित् कलहंसं निवारयितुं कृतप्रयत्नायाः सुरतमञ्जर्य्याः हारयष्टिः निम्ने हैमवते मन्दिदके सरसि मग्नोन्मग्नस्य महर्षेः मार्कण्डेयस्य मस्तके अपतत्। मुनिश्च ताम् - " पापे भजस्व लोहजातिमजातचैतन्या सती" - इति शशाप। तदनु वहुधा प्रसादितः स मुनिः मासद्वयमात्रं श‍ृङ्खलत्वम्, पञ्चेन्द्रियाणाम् अपरिक्षीणशक्तित्वञ्च अकल्पयत्। अथ रजतश‍ृङ्खलीभूतां तां वीरशेखरो नाम विद्याधरः कैलासे प्राप्तवान्। स पुनः नरवाहनदत्ते कलुषितचित्तः दर्पसारेण सह मिलितोऽभूत्। दर्पसारश्च तं तस्मै भगिन्याः

अवन्तिसुन्दर्य्याः प्रदानम् करिष्यतीति, प्रतिश्रुतिं ददौ। एकदा वीरशेखर्ः प्राणप्रियाम् अवन्तिसुन्दरीं दिद्दक्षुः तिरस्कारिणीविद्यावलेन प्रच्छन्नः सन् कन्यान्तःपुरं प्रविवेश। अवन्तिसुन्दरीं राजवाहनेन सह सुखशयानां द्दष्ट्वा नितरां क्षुव्धः सः रजतशृङ्खलीभूतया सुरतमञ्जर्य्या राजवाहनस्य चरणयुगलं निगडयित्वा वहिर्गतः। ततः प्रभृतिः मासद्वयं राजवाहनस्य शृङ्खलितत्वम्। अस्य स शापः अवसितः। शापमुक्तोः हृष्ट्वा सुरतमञ्जरी तस्याः किमपि करणीयमस्ति वा नवेति पृच्छति राजवाहनम्।